# Shri Kubacharyapranita Prabodharatnamala

# શ્રીકુબાચાર્યપ્રણીતા પ્રબોધરત્નમાલા

## Document Information

Text title : Shri Kubacharyapranita Prabodharatnamala

File name : prabodharatnamAlAkubAchArya.itx

Category : raama, rAmAnanda, shataka

Location : doc_raama

Author : kubAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીકુબાચાર્યપ્રણીતા પ્રબોધરત્નમાલા

(શ્રીકેવલરામાચાર્ય)

રામં સુરેશાર્ચિતપદ્મપાદં પ્રફુલ્લનીલાબ્જસમાનકાન્તિમ્ ।
એક બહુસ્યામિતિ બુદ્ધિમન્તં નમામિ નિત્યં ભવસિન્ધુપોતમ્ ॥ ૧॥

રામાનન્દઃ પ્રકૃતિતનુભૃદ્ બ્રહ્મમન્તાત્રિદણ્ડં
કાષાયં યઃ શ્રુતિતનુપટં ધારયન્ બ્રહ્મસૂત્રે ।
ગીતાયાં વા ઉપનિષદિસમે દિવ્યમાનન્દભાષ્યં
કુર્વન્ ભક્તિં જયતિ ભુવને તં સ્તુવે સંવિતન્વન્ ॥ ૨॥

સાયુજ્યમુક્તિં યદિ વાઞ્છતિપ્રભોસ્તાપત્રયામ્ભોજવિધુંસુમાનવઃ ।
રામસ્યભક્તિ ધ્રુવશાન્તિકારિણીં સંવિત્સ્વરૂપાં સતતં કરોતુ સઃ ॥ ૩॥

સમસ્તવેદતત્વજ્ઞં દાન્તં વૈરાગ્યભાજનમ્ ।
દયાસમન્વિતં શશ્વત્પરોપકારશાલિનમ્ ॥ ૪॥

શ્રીવૈષ્ણવં લબ્ધસુરામમન્ત્રં ગત્વાવિરક્તં મનુજઃ સુખાર્થી ।
શાન્તં ગુરુંસ્વાત્મવિશુદ્ધતાયૈ વર્ષત્રયન્તસ્ય જુષં વિદધ્યાત્ ॥ ૫॥

સૌમ્યં સમિત્કરં શિષ્યં વીક્ષ્ય તસ્ય ભવચ્છિદે ।
ગોશફપ્રમિતાં દિવ્યાં શિખાં વિના બુધો ગુરુઃ ॥ ૬॥

કારયિત્વા તતઃ ક્ષીરં સ્નાપયિત્વા વિધાનતઃ ।
શિષ્યં સુસત્વસમ્પન્નં નવ્યવસ્ત્રોપવીતિકમ્ ॥ ૭॥

શ્રુતિમન્ત્રૈશ્ચસમ્માદત્વા રામપદોદકમ્ ।
તત્તસ્મૈ બોધયિત્વા સદ્ ધર્મવાક્યં યથાવિધિ ॥ ૮॥

ભગવત્સમ્મુખે વેદી કૃત્વા હુત્વા શુભે તિથૌ ।
શ્રીરામમન્ત્રતઃ સમ્યક્ પઞ્ચામૃતે ધનુઃ શેરૌ ॥ ૯॥

સ્નાપયિત્વા તતસ્તસ્ય શુદ્ધેઽગ્નૌ તાપયેજ્જલે ।

તપ્તધનુઃ શરાભ્યાઞ્ચ સ્વઙ્કયેદ્બાહુમૂલકે ॥ ૧૦॥

સુદ્વાદશોર્ધ્વપુણ્ડ્રાંશ્ચ રક્તશ્રીભૂષિતાન્ કિલ ।
વિદધ્યાત્ તિલકાન્ પશ્ચાત્ તુલસીમાલીકાં શુભામ્ ॥ ૧૧॥

દધ્યાત્ ષડક્ષરં મન્ત્રં શ્રીરામસ્ય ભવચ્છિદમ્ ।
તદર્થં તદ્વિધિશ્ચાપિ બોધયેત્ તં વિધાનતઃ ॥ ૧૨॥

ચરમાદીન્ કિલાન્યાઁસ્તુમન્ત્રાંસ્તસ્મૈ દિશેદ્ગુરુઃ ।
ગાયત્રીં વિતરેત્સાર્થં રામસ્ય સવિધિન્તથા ॥ ૧૩॥

ભગવન્નામસમ્બન્ધિનામકુર્યાન્મનોહરમ્ ।
એતાન્ પઞ્ચસુસંસ્કારાન્નિવર્તયેદ્ ગુરુઃ સ્વયમ્ ॥ ૧૪॥

શ્રદ્ધાલુભવેચ્છિષ્યો ભવબન્ધનમુક્તયે ।
ગુરોરાજ્ઞાં સદા શિષ્યઃ શિરોધાર્યાં સુમાનયેત્ ॥ ૧૫॥

ગુરુશ્ચાપિ કદાચિત્ તં દુઃખકર્મણીહ હિ ।
ન યોજયેદ્ભવેરુર્ધ્વરેતાસ્ત્વં શિષ્ય શંવ્રજ ॥ ૧૬॥

પરાર્થઃ સત્યસન્ધશ્ચ પ્રેક્ષાયુક્તોઽપ્યભૂઃ સદા ।
પ્રાતરુત્થાય શિષ્ય ! ત્વં સ્નાનાદિકાર્યમાચરેઃ ॥ ૧૭॥

સન્ધ્યાં ત્રૈકાલિકીં કુર્યા સ્તતો ભગવતો જુષમ્ ।
શ્રીભાગવતશુશ્રૂષાં ન તદ્ ભેદદૃશં ક્વચિત્ ॥ ૧૮॥

સ્વસ્મૈ યાઞ્ચા ન કર્તવ્યા ભાગવતાર્થમેવ ચ ।
એકાકી ન કદાપિત્વં વસેઽસ્તુ વૈષ્ણવૈઃ સમમ્ ॥ ૧૯॥

વિષ્ણુશ્રીરામભક્તિ શ્રુતિગણવિદિતાં કામધેનોઃ સમાનાં
શશ્વત્સાયુજ્યમુક્તેઃ ખલુ સુવિતરિણીન્ધાતૃશર્વાદિકામ્યામ્ ।
પ્રલ્હાદેષ્ટાશુકર્ત્રીં સુરનિકરનુતાં શેમુષી સસ્વરૂપાં
કુર્યાન્નિત્યં મનુષ્યોગતજનિકુશલીનો કદાચિદ્વિમુઞ્ચેત્ ॥ ૨૦॥

વૈષ્ણવાનામપમાનં કસ્મિન્નંશેનકારયેત્ ।
અપિસત્કારમેવાશુવિપરીતોઽશિવંવ્રજેત્ ॥ ૨૧॥

વિરક્તો વૈષ્ણવો ભૂત્વાવિવાહં નહિ કારયેત્ ।
રેતઃ પાતો ન કર્તવ્યસ્તં કૃત્વાપતિતોભવેત્ ॥ ૨૨॥

ભૂત્વામહાન્તોયદિયોવિરક્તોમૌર્ખ્યાત્સ્વકઙ્કામયતેવિવાહમ્ ।

ધર્મચ્ચ્યુતેસ્તસ્ય વહિષ્કૃતિંસઙ્કુર્યુર્વિરક્તાઃ સ્તુતવૈષ્ણવાવૈ ॥ ૨૩॥

સમાજદૂષકઃ સાધુર્યઃ કશ્ચિત્સ્યત્સુધીરપિ ।
સ ત્યાજ્યઃ સુવિરક્તૈશ્ચ શ્રીવૈષ્ણવઃ સનાતનૈઃ ॥ ૨૪॥

સઙ્ગતિર્યત્નતઃ કાર્યા પરસ્પરં સુવૈષ્ણવૈઃ ।
સ્થાનમ્પ્રાપ્યસ્વધર્મો ન હેયોબુદ્ધિવિશારદૈઃ ॥ ૨૫॥

ભગવદ્વૈષ્ણવેભ્યશ્ચ યશ્છદ્મકારકોજનઃ ।
અધઃ પતનમાયાતિ સહસ્ત્રં જન્મનિશ્ચયમ્ ॥ ૨૬॥

નિખિલભુવનજન્મસ્થૈર્યસંહારકર્તુઃ
ભજનમનનલબ્ધેર્વેદબુદ્ધેશ્ચ વિષ્ણોઃ ।
જનકુમુદસુધાંશોર્બ્રહ્મરામસ્યમન્ત્રઃ
ભવજલધિસુસેતોર્જીવમાત્રાય દેયઃ ॥ ૨૭॥

સચ્ચારિત્રદયાશમાદિનિલયઃ શ્રીરામભક્તિપ્રિયઃ
દમ્ભાસત્યવિવર્જિતોમિતવચાઃ કામાદિશત્રુત્યજઃ ।
સૌમ્યોવિશ્વજનીન આર્ષમતગોવક્તા ચ સદ્ધર્મનઃ
કૃત્યાકૃત્યમતિઃ પુનાતિભુવનં વા ઈદૃશોવૈષ્ણવઃ ॥ ૨૮॥

શ્રીરામાર્પિતમન્નં યદ્દેવદુર્લભમસ્તિતત્ ।
ભુઞ્જતે ભાગ્યવન્તઃ શ્રીતુલસીદલમિશ્રિતમ્ ॥ ૨૯॥

શ્રીરામકૃષ્ણમૂર્તિઃ સચ્છાલગ્રામાકૃતિસ્તથા ।
પૂજ્યાધ્યેયાસદાભક્ત્યા શ્રીવૈષ્ણવૈર્જગદ્ધિતૈઃ ॥ ૩૦॥

પ્રતિષ્ઠા ભગવન્મૂર્તેઃ કાર્યા શ્રીવૈષ્ણવૈર્બુધૈઃ ।
તદન્યૈઃ સ્થાપિતા સા ચેત્સંસ્કાર્ય્યા વૈષ્ણવૈઃ પુનઃ ॥ ૩૧॥

અન્યથાસાઽનમસ્કાર્ય્યાતથોપાસ્તિવિવર્જિતા ।
સા ચ ભવતિ નિસ્તેજા ભાનૂદયે પ્રદીપવત્ ॥ ૩૨॥

સાર્ધહસ્તત્રયં વસ્ત્રં સકૌપીનં શ્રુતીરિતમ્ ।
તદેવધાર્ય્યમસ્તિ શ્રીવૈષ્ણવાનાં શુભાવહમ્ ॥ ૩૩॥

ધૌતં કચ્છયુતં નોહિ ધાર્ય્યં વિરક્તવૈષ્ણવૈઃ ।
નોતર્હિ વિમલેધર્મે દોષોલગતિનૈજકે ॥ ૩૪॥

સ્વવેષોલોભતો ભીતેર્નહેયોવૈષ્ણવૈઃ સમૈઃ ।

મૂર્ખોભવતિ સત્યાજ્યસ્તથાસતિસ્વધર્મહા ॥ ૩૫॥

એકાદશીવ્રતઙ્કાર્યં શ્રીરામનવમીવ્રતમ્ ।
કૃષ્ણાષ્ટમીવ્રતં દિવ્યં નિજાત્મશુદ્ધ્યૈસદા ॥ ૩૬॥

અન્યમતં ન નિન્દેદ્ધિસ્વમતં માનયઞ્ છુભમ્ ।
પ્રાણિભિઃ સહબૈરં નો પ્રકુર્યાદ્વૈષ્ણવોબુધઃ ॥ ૩૭॥

પ્રાપ્તા અતિથયઃ સર્વે સત્કાર્યાયત્નતઃ સદા ।
યથાશક્તિનિજસ્થાનેવૈષ્ણવાસ્તુવિશેષતઃ ॥ ૩૮॥

ઉત્સવોનિખિલઃ કાર્યોભગવતશ્ચવાર્ષિકઃ ।
નવ્યાન્નં સુફલં નવ્યં તન્નૈવેદ્યાર્થમાનયેત્ ॥ ૩૯॥

યથાસમ્પત્તિસાનન્દં કાર્ય્યાતન્ન્યૂનતાનહિ ।
અનર્પિતં ન ભોક્તવ્યં કિઞ્ચિદ્વસ્તુક્વચિત્પ્રભોઃ ॥ ૪૦॥

અન્યથાપતિતોભૂત્વાઽધોગતિં લભતે ધ્રુવમ્ ।
મહાન્તપદવિઙ્ગત્વા યઃ શ્રીભગવતોધનમ્ ॥ ૪૧॥

સ્વસ્મૈ કુટુમ્બિને રાતિ દુરવ્યયં કરોતિ ચ ।
સ ચાણ્ડાલત્વમાપ્નોતિ જન્મકોટિશતં કિલ ॥ ૪૨॥

ધર્માર્થમિલિતં દ્રવ્યં યોઽધર્મેવ્યયતે શઠઃ ।
વૈષ્ણવાર્થઞ્ચસમ્પ્રાપ્તં વસ્તુતેભ્યોનરાતિચેત્ ॥ ૪૩॥

સ ગર્દભત્વમાયાતિ સહસ્રં જન્મનિશ્ચયમ્ ।
વૈષ્ણવાર્થં કિલસ્વલ્પં તથા ભગવતેઽપિ ચ ॥ ૪૪॥

વસ્તુ દદાતિનૈજાર્થમ્મહન્મહચ્ચમન્દધીઃ ।
ગૃહીત્વા રમતેનિત્યં શૂકરત્વં સ ગચ્છતિ ॥ ૪૫॥

રામભક્તેરસં સર્વકલ્યાણદં સભ્યસામાજસન્માનદં સુન્દરમ્ ।
સમ્પિવેદ્વૈષ્ણવોઽસભ્યતાસૂચકં ધૂમપાનં વિદધ્યાન્નદુઃખાવહમ્ ॥ ૪૬॥

ભવ્યાં સમ્પત્તિમીશસ્ય ધર્માર્થમિલિતાં હરેઃ ।
તત્સેવાયાન્તથા ચ શ્રીવૈષ્ણવસત્કૃતૌ વ્યયેત્ ॥ ૪૭॥

ત્રિપુણ્ડ્રં ભસ્મનોદધ્યાચ્છ્રીવૈષ્ણવઃ કદાપિ વૈ ।
પઞ્ચકેશજટા શ્રીમદ્ભદ્રરૂપાતિશોભિતઃ ॥ ૪૮॥

રામાનન્દસુમાનિતે શ્રુતિનુતે શ્રીસમ્પ્રદાયે શુભે
કાષાયોऽસ્તિ પટઃ સિતોऽપિ વિહિતોભવ્યઃ શિખાસંયુતઃ ।
શ્રીલશ્રીતિલકેન ભૂષિતતમો યજ્ઞોપવીતસ્તુતઃ
સંન્યાસોऽસ્તિ વરસ્ત્રિદણ્ડસહિતોમાન્યશ્ચતુર્થાશ્રમઃ ॥ ૪૯॥

દેવભાષા સતીપાઠ્યા વિરક્તૈઃ વૈષ્ણવૈઃ સમૈઃ ।
તાં વિના નિજધર્મોऽપિ શશશ‍ૃઙ્ગાયતે ધ્રુવમ્ ॥ ૫૦॥

સદ્ વ્યાખ્યાનૈઃ સદાચારૈઃ સ્વધર્માચરણૈસ્તથા ।
આત્મનશ્ચ જનતાયા હિતં કુર્યાદ્વિવૈષ્ણવઃ ॥ ૫૧॥

એકમેવાદ્વિતીયં ન ભોઃ સિદ્ધ્યતે વાક્યતોऽદ્વૈતવાદશ્ચ તન્નેતિ વૈ ।
એકશબ્દોऽસ્તિ નામાદિભિર્ઘાતકો હ્યદ્વિતીયં પરાધારહીનં પદમ્ ॥ ૫૨॥

રામઃ કુજા વાયુસુતો વિધિઃ સુધીઃ શ્રીમાન્ વશિષ્ઠઃ સુપરાશરોનુતઃ ।
વ્યાસઃ શુકઃ સંસૃતિજીવમોક્ષદસ્ત્વિત્યાદિકાऽऽચાર્યપરમ્પરાऽસ્તિ મે ॥ ૫૩॥

અસ્મન્મતં વરીવર્તિ વિશિષ્ટાદ્વૈતમીરિતમ્ ।
બ્રહ્મસૂત્રેષુ ગીતાયાં સર્વોપનિષદિ ધ્રુવમ્ ॥ ૫૪॥

ઉપાસ્યો વર્તતે રામો હેયગુણપ્રહીણકઃ ।
રામ એવ પરમ્બ્રહ્મેતિ મન્યે કથિતઃ પ્રભુઃ ॥ ૫૫॥

દાક્ષિણ્યાદિગુણૈર્યુક્તઃ સર્વજ્ઞો વ્યાપકો હરિઃ ।
સત્યસાકેતધામસ્થો નિત્યમૂર્તિસમાશ્રિતઃ ॥ ૫૬॥

અન્તર્યામી પ્રભૂ રામો ધર્માધર્મપ્રશાસકઃ ।
ધર્મોऽધર્મોજડત્વાત્સ્વં ફલં દાતું ન શક્નુયાત્ ॥ ૫૭॥

ધર્માદિફલલબ્ધારો દૃશ્યન્તે બહવો જનાઃ ।
અતસ્તત્પ્રેરકો રામો મન્તવ્યોऽસ્તિ વિચક્ષણૈઃ ॥ ૫૮॥

જીવોऽલ્પજ્ઞોऽવિભુર્નિત્યો જ્ઞાનં તસ્ય વિભુ સ્મૃતમ્ ।
અનેકં વસ્તુ ગૃહ્ણાતિ યુગપદ્ધિ યતઃ સ્વયમ્ ॥ ૫૯॥

કેશાગ્રશતભાગોऽસ્તિ સ ચાનન્ત્યં વ્રજેદ્ ધ્રુવમ્ ।
બ્રહ્મસમાનમુક્તિઃ સ જગદ્-વ્યાપારવર્જિતઃ ॥ ૬૦॥

ભવ્યા સાયુજ્યમુક્તિસ્તુ તસ્ય વેદે સમીરિતા ।
ઘટના-રહિતમાયેત્યુચ્યતે બુદ્ધિમત્તમૈઃ ॥ ૬૧॥

સત્ત્વાદિનિલયોઽજ્ઞા સા માન્યાઽજા પ્રકૃતિર્બુધૈઃ ।
પરાર્થો વિશ્વયોન્યંશોઽનેકવર્ણા ચ વિદ્યતે ॥ ૬૨॥

તદ્વિશિષ્ટસ્તમોહન્તા રામો બ્રહ્માભિધઃ સ્મૃતઃ ।
દયાલુઃ પ્રલયે ભાતિ સચ્ચિદાનન્દમૂર્તિકઃ ॥ ૬૩॥

માયાજીવૌ હરેર્દેહૌ પરવન્તૌ સદા હિ તૌ ।
હરિર્નિત્યોઽસ્ય દેહોઽપિ નાતો દોષલવો ભવેત્ ॥ ૬૪॥

જીવોઽણુર્યદિ મન્યતે સહચરં કર્માપિ તસ્યાસ્તિ ભોઃ
સાકેતં ગતવાઞ્જનઃ સુખમિતઃ શીઘ્રં સુખાપ્તિર્ભવેત્ ।
નિર્હેતુર્નહિ કારણં કિલવિના સ સ્યાદિદં દૂષણં
સઙ્કલ્પસ્તદદૃષ્ટકં ભગવતો રામો વિભુર્વિદ્યતે ॥ ૬૫॥

તદ્બ્રહ્માપિ પ્રભુરામપૃથક્ સિદ્ધિસમ્બન્ધતોયત્
સૂર્યાબ્જેન્દ્રપ્રભૃતિવિબુધાશાસકં ભક્તિલભ્યમ્ ।
તત્તત્કાર્યૈયુતજનિમતાં દર્શનાચ્ચાનુમેયં
સ્વસ્માત્ સૃષ્ટૌહિં મનુજકૃતૌદોષ આત્માશ્રયાદિઃ ॥ ૬૬॥

કર્માનધીનતનકો નિજવાઞ્છયા યઃ
પાતું કલેવરગણં ધરતે પ્રપન્નાન્ ।
રામો હ્યજો નિખિલશક્તિગૃહં સુજીવા-
ઽજ્ઞેયો દયાર્દ્રહૃદયો વિજરો વિમૃત્યુઃ ॥ ૬૭॥

સ્થૂલપ્રકૃતિજોઽતો ન મમ મતેઽસ્તિ પરિણામવાદઃ ।
સદ્વારકોબ્રહ્મણિ હિ વિકારસંજ્ઞો દોષઃ શ્રીરામે ॥ ૬૮॥

યથોર્ણનાભિઃ સ્વાઽઽસ્યાત્ તન્તૂન્ નિઃસાર્વગૃહં વિરચય્ય ચ ।
નિવસતિ ન તત્સ્વરૂપેઽપિ વિકારસ્તથેનસ્ય મમ નહિ ॥ ૬૯॥

સત્ખ્યાતિરસ્તિ મન્તવ્યા વૈષ્ણવસમયે શુભે ।
પઞ્ચીકરણરીત્યા હિ સર્વં સર્વત્ર વર્તતે ॥ ૭૦॥

સર્વઃ કિલ પદાર્થશ્ચ પ્રતીત્યભ્યુપગમ્યકઃ ।
સત્ખ્યાતિઃ સુદૃઢા જાતેત્યેતેન જ્ઞાયતાં બુધાઃ ॥ ૭૧॥

નાસ્તિ પ્રતીતિવિષયઃ ખલુ યઃ પદાર્થ
સ્તત્કલ્પના ખસુમનઃ સદૃશી સુવેદ્યા ।
યદ્ યત્ પદં જગતિ વાઞ્છતિ વૈ મનુષ્યો

નાપ્નોતિ તર્હિ જગદીશપવિત્રસત્તા ॥ ૭૨॥

યદિ સા મન્યતે તર્હિ ક્ષિતૌ વહ્નેર્ગુણઃ સ્વયમ્ ।
પ્રતીયેતોચ્યતે હ્યત્ર નિશ્ચિતં મતમુત્તમમ્ ॥ ૭૩॥

ઉર્વ્યામગ્નેર્ન ભાનં સ્યાદુર્વ્યા અધિકભાગતઃ ।
યદાધિક્યં તુ તદ્ભાનં કાઽત્ર યુક્તિર્નિશમ્યતામ્ ॥ ૭૪॥

વૈશેષ્યાત્ ત્વિતિ માનેન સન્તોષઃ ક્રિયતામયે ।
તત્ત્વમસ્યાદિવાક્યૈસ્તુ કેવલાદ્વૈતધીનહિ ॥ ૭૫॥

શરીરશરીરિભાવો નિશ્ચેતું શક્યસ્તત્ત્વમસિ પદે ।
ષષ્ઠ્યાદેઃ પ્રથમાતો વ્યત્યયો બહુલમિતિ સૂત્રતસ્તદિહ ॥ ૭૬॥

યસ્યાઽઽત્મા શરીરં ચ શ્રુતિતોઽસ્તિ શરીરશરીરિભાવોઽપિ ।
નિર્ગુણમિતિ વાક્યાર્થેઽયં હેયગુણપ્રહીણં ? ॥ ૭૭॥

દયાદાક્ષિણ્યકાદ્યબ્ધિરિતિ જ્ઞેયો ભવાદૃશૈઃ ।
શ્રીરામો બ્રહ્મશબ્દેન સર્વોપનિષદીરિતઃ ॥ ૭૮॥

શબ્દશાસ્ત્રદિશા વાદિન્ નિરાકારત્વમન્નનો ।
બ્રહ્મણિ સિધ્યતે કિન્તુ સાકારત્વં સ્થિરં ભવેત્ ॥ ૭૯॥

આકારઞ્ચ વિના પૂર્વં સમાસો જાયતે કથમ્ ।
વ્યાકરણસ્ય નો લેશો વર્તતે ત્વયિ નિશ્ચિતમ્ ॥ ૮૦॥

તત્સિદ્ધ્યર્થઞ્ચ પૂર્વં ત્વં શબ્યશાસ્ત્રં ગુરોઃ પઠ ।
નો ચેદ્ ભવદ્વચઃ સૌમ્ય હ્યાકાશકુસુમાયતે ॥ ૮૧॥

સ્વાકારે ભેદવાદે ચ હ્યવતારે હરેઃ પ્રભોઃ ।
શ્રુતિરસ્તિ યતો મર્ત્યો ન સન્દેગ્ધિ ક્વચિત્ કિલ ॥ ૮૨॥

સ પર્યગાચ્છુક્રમકાયમવ્રણં શુભં શરીરં પૃથિવીતિ યસ્ય યત્ ।
તમેવ ભૃત્વા નિદધે પદં ત્વિદં વિચક્રમેવિષ્ણુરિતિ પ્રસિદ્ધકમ્ ॥ ૮૩॥

જિજ્ઞાસ્યજિજ્ઞાસકભાવના ભવેદ્ ભેદે હિ નાભેદ ઇતિ પ્રસિદ્ધકમ્ ।
યદ્ “દ્વા સુપર્ણા” શ્રુતિરસ્તિ વૈ ભિદી
વા વક્તિ શં “તત્ ત્વમ” સીતિ ભેદકમ્ ॥ ૮૪॥

વરાકી સમ્મતા માયા શક્નોતિ ભવતાં નહિ ।
કાર્યં કિમપિ કર્તું સાઽજ્ઞત્વાજ્જડત્વહેતુતઃ ॥ ૮૫॥

કિન્તુ સમં જગત્ સ્વયં ચિદચિદાત્મકં બ્રહ્મ કુરુતેઽઙ્ગ ।
જગત્ પ્રતિ તદેવાસ્તિ હ્યભિન્નનિમિત્તોપાદાનકારણમ્ ॥ ૮૬॥

નિરાકારમિતિ શ્રુત્યર્થોઽયં બ્રહ્મ નુ વર્તતે ।
કર્માનાયત્તન્મૂર્તિ પ્રતિભા શક્તિતંસિતમ્ ॥ ૮૭॥

ઘટાભાવે કથં તસ્યાભાવં શક્તાઃ પ્રવલ્ગિતુમ્ ।
ભવાદૃશા ભવિષ્યન્તિ યુક્તિઃ કાઽત્ર વિચાર્યતામ્ ॥ ૮૮॥

તથૈવ પ્રકૃતે જ્ઞેયમતસ્તત્ સાકૃતીષ્યતામ્ ।
સાઽઽકારં નાશમાપ્નોતિ વસ્તુ ઘટાદિવત્ સદા ॥ ૮૯॥

તથૈવ તદપિ સ્યાદ્ ભો દોષોઽયં વાર્યતાં ત્વયા ।
શ્રૃણુતાઙ્ગઃ ન તદ્ બ્રહ્માઽનિત્યાકારઘટાદિવત્ ॥ ૯૦॥

કિન્તુ નિત્યાઽઽકૃતિ બ્રહ્માકર્તૃકં વર્તતે કુતઃ ।
નાશાર્હં સ્યાદનવસ્થા તસ્મિન્ સકર્તૃકેઽપ્રિયા ॥ ૯૧॥

પ્રકૃતેઃ શરીરવતાં પ્રભોર્જગદીશ્વરસ્ય ચ કીદૃશઃ
વદતાઽથિ નૈકનિવાદિનઃ ! ખલુ વર્તતે ભવતાં મતે ।
શુભદેહદેહિકશેષશેષિકભાવકઃ શ્રૃણુ માયિક !
ઇતિ ભો નિયમ્યનિયામકત્વમયં પટો મમ બુધ્યતામ્ ॥ ૯૨॥

આજાનુબાહુર્નિગમાદિગીતઃ સત્યવ્રતઃ સદ્વિભુજઃ સ્વતન્ત્રઃ ।
સદ્ધીરયોધ્યાપતિશાર્ઙ્ગપાણિર્નિત્યાઽઽકૃતિઃ સત્યદયાદિગેહમ્ ॥ ૯૩॥

શ્રુતિમાર્ગાબ્જસમાર્શ્વઃ શ્રીરામો ભક્તવત્સલઃ ।
જાનરાયપદેનાપિ સ એવ પ્રથિતો ભુવિ ॥ ૯૪॥

સાકારં જ્ઞાયતે વસ્તુ ભૂમિજલાદિવત્ સદા ।
શશશૃઙ્ગાદિવજ્જાતુ નિરાકારં ન બુધ્યતે ॥ ૯૫॥

જ્ઞાતૃજ્ઞેયાદિ ભેદે હિ ભોગમાત્રાદિ સામ્યકમ્ ।
વ્યાસોક્તિઃ કથયન્ચતી સ્યાત્ સાર્થિકા નાન્યથા કિલ ॥ ૯૬॥

અનિર્વાચ્યાખ્યાતિશ્ચ સદસદ્વિલક્ષણાર્થિકાઽસ્તીતિ તે ।
કથં ન ખપુષ્પસદૃશં કથં શશશૃઙ્ગવત્ તદ્વિલક્ષણમ્ ॥ ૯૭॥

વસ્ત્વેવાપ્રસિદ્ધં નુ જગતિ શુક્ત્યાદૌ રજતાદિ સત્યમ્ ।

અસ્તીતિ વિજ્ઞાયેત પઞ્ચીકરણપ્રક્રિયયા સમકૈઃ ॥ ૯૮॥

સા તુ ભવતાઽપિ સતતં મન્યતે તયાઽસ્તિ સર્વં સર્વત્ર ।
સમસ્મિન્ સર્વલાભઃ સ્યાદિતિ ન વાચ્યં તત્ તદ્વિશેષાત્ ॥ ૯૯॥

ક્ષિતિશુક્તૌ શુક્તયંશોઽધિકોઽસ્તીતિ સ ઉપલભ્યતે સર્વૈઃ ।
તેજોભાગાલ્પત્વાન્ન તદુપલભ્યતે મદ્વિજયઃ ॥ ૧૦૦॥

તદ્વિલક્ષણોત્પત્તી રજતસ્ય જાયતે નહિ સતોજનેઃ ।
નિષેધનાદતશ્ચ સત્ખ્યાતેઃ સિદ્ધિરનિર્વાચ્યં કસ્માત્ ॥ ૧૦૧॥

ધૃતોર્ધ્વપુણ્ડ્ર ઇત્યેષા શ્રીધન્વનાઽઙ્કિતઃ શ્રુતિઃ ।
જ્ઞાયતાં ચ હિ સદ્ બીજમૂર્ધ્વપુણ્ડ્ર ધનુર્વિધૌ ॥ ૧૦૨॥

દાસઃ પદં શ્રુતાવસ્તિ નાતો ઘૃણા વિધીયતામ્ ।
શ્રુત્યનભિજ્ઞ ! પશ્ય ત્વમ્-અરં દાસો ન મીઢુષે ॥ ૧૦૩॥

તુલસીમાલાધૃતિશ્ચનાપ્રામાણિકીવિગણ્યતામ્ ।
શ્રુતિરસ્તિતત્રત્વમિતિમાલાન્તુલસીજાં પશ્ય ॥ ૧૦૪॥

આમ્નાયાપૌરુષેયત્વમસ્તિ સર્વયુગેષ્વપિ ।
તન્નિત્યત્વમિદં કિઞ્ચ સર્વવેદાન્તસમ્મતમ્ ॥ ૧૦૫॥

આનુપૂર્વ્યા અભઙ્ગસ્તુ વેદમન્ત્રવ્રજસ્ય હિ ।
કસ્મિન્ યુગેઽપિ નેશશ્ચ તદાનુપૂર્વિકાં ઘતિ ॥ ૧૦૬॥

પુરાસૃષ્ટેરીશોજનયતિવિધિં શાન્તિનિલયો
જગત્સૃષ્ટિં કર્તું હ્યુપદિશતિ તસ્મૈ શ્રુતિચયમ્ ।
યથાપૂર્વં સર્વાન્ સૃજતિ સ તુ લોકાન્ સિતમતિઃ
ત્રયીણાં નિત્યત્વં દ્રઢયતિ શમેતેન વિમલઃ ॥ ૧૦૭॥

ભો વાદિન્ ! પ્રતિમાપૂજનાન્ન ફલં કિઞ્ચિદ્ભવતીતિ નહિ યતઃ
સર્વસ્મિન્સ્તદભાવસ્ય વક્તુમશક્યત્વાત્ પ્રતિમાઽર્ચનકવિધેઃ ।
કાલે શ્રુત્યુપચયે વર્તનાચ્ચ તતોમુક્તેઃ પ્રતિપાદનકકૃતેઃ
સત્ત્વાચ્છાસ્ત્રચયે ચન્દ્રમામનસોજાતસ્ત્વિતિતત્ સફલત્વગાત્ ॥ ૧૦૮॥

ન તસ્ય પ્રતિમાઽસ્તીતિ તન્નિષેધાદુપાસિતું કલ્પ્યતે ।
ફલવાર્તાઽસત્યા તદ્-યસ્યનામમહદ્યશઃ સદૃશાર્થકમ્ ॥ ૧૦૯॥

રામાનુજમતાદ્ભિન્નં શ્રીરામાનન્દસન્મતમ્ ।

મન્ત્રોપાસ્યેષ્ટદેવસ્ય ભેદાદેવેતિ નિશ્ચિતમ્ ॥ ૧૧૦॥

રામાનન્દમહાસુહૃત્સુરસુરાનન્દસ્ય સદ્વંશજઃ
રક્તશ્રીતિલકાભિરામશિરસઃ સત્ક્ષાન્તિપાથોનિધેઃ ।
માયાવાદિગજેન્દ્રકુમ્ભદલને સિંહાયમાનસ્ય ચ
શિષ્યોઽહં નરસિંહનામકગુરોઃ શ્રીઝીથડાવાસકઃ ॥ ૧૧૧॥

ઇતિ શ્રીકુબાચાર્યપ્રણીતા પ્રબોધરત્નમાલા સમ્પૂર્ણા ।

Encoded and proofread by Mrityunjay Pandey

*Shri Kubacharyapranita Prabodharatnamala*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*